लोकप्रियसाहित्यग्रन्थमाला-67

# हरिश्चन्द्रचरितम्

लेखकः
डॉ. राजाराम हजारी पाठकः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम्)
नवदेहली

## (पुरोवाक्)

विदन्त्येव विज्ञा यत् साम्प्रतिकेऽस्मिन्नतिविचित्रसमयान्विते समये संस्कृते विपुलं वाङ्मयं विरच्यते सुरसरस्वतीसमाराधकैः। तेनेयं संस्कृतसाहित्यपरम्परा यथा सनातनी तथैव प्रतियुगं पुनः पुनरुदीयमाना उषेव नवविच्छितिं नूतनां च च्छविमाविर्भावयन्ती वरीवर्ति, इदानीमपि स्वमहिम्नि प्रतिष्ठिता चास्ते। वस्तुतः समसामयिकसंस्कृतसाहित्यस्य नवोन्मेषः कामपि विशिष्टामभिख्यां तनोति स्वकीयाम्। नैके उदीयमानास्तरुणास्तेजस्विनः पण्डिताः प्रकटयन्ति शास्त्रवैभवमस्याः। तथा च कवयन्ति परःशतं सुकवयो निबध्नन्ति च विविधान् ग्रन्थान् अगणिताः साहित्यरचनानदीष्णाः सरस्वत्याः सुपुत्रा अस्यामेव भाषायाम्। नवनवोन्मेषप्रतिभाशालिभिः सुकविभिर्विरचिते संस्कृतसाहित्ये परिलक्ष्यन्ते नवीनाः प्रवृत्तयः, युगबोधः, अभिनवा कापि चारुता च। नवीनरचनासु सन्ति भूयांसि महाकाव्यानि। अथवा सरलेनापि तथ्यमयेन गम्भीरविवेचनपरेण गद्येन बद्धाः प्रबन्धाः। अद्यत्वे नाटकानि, गद्यात्मकाः प्रबन्धाः कथोपन्यासादयः समधिकतरमा–वर्जयन्ति साम्प्रतिकानां पाठकानां मनांसि। महाकाव्ये कल्पनाया वितानं वितनोति कविः, छन्दसां सम्भारेणाराधयति सरस्वतीम् अलङ्कारैरेनामलङ्करोति च। कामं प्रतायन्तां महाकाव्यानां मनोहारिण्यो रचना महाकविभिः, परन्तु विमर्शबहुले तर्ककर्कशजटिले वर्तमानकाले युगानुरूपं तथ्यात्मकम् ऋजु च गद्यं समधिकतरमपेक्ष्यते।

अवसरपठिता वाणी कल्याणी भवति। युगस्य प्रवृत्तीरात्मसात् कृत्वैव साहित्यकाराः रचनाकर्मणि प्रवर्तन्ते। यद्यपि सन्ति हरिश्चन्द्रमधिकृत्य नैके प्रबन्धाः आधुनिके प्राचीने च संस्कृतसाहित्ये। तद्यथा– महाकवेः क्षेमीश्वरस्य चण्डकौशिकम् नाम नाटकं तत्र सुप्रथितं नाट्यप्रकार्षदृशा काव्यसमृद्धिदृशाऽपि च कमपि उत्कर्षं प्रतिभापाटवं च व्यनक्ति। हरिश्चन्द्रोदयम् इति गद्यप्रबन्धः श्रीमतां रामजीउपाध्यायानां प्रथते। अस्यां परम्परायां महापुरुषगुणसङ्कीर्तनविहितमतिना साहित्यसेवाव्रतिना कृतिना श्रीराजारामहजारिवर्येण विरचितेयं कृतिः सरलेन सुगमेन गद्यबन्धेन सत्यव्रतिनं कृतिनं हरिश्चन्द्रं परिचाययति। इयं बुधजनसमाजे समाद्रियेत, अभिनवरचनापठनकुतूहलचुलुकितेभ्यश्च पाठकेभ्यः परितोषं प्रदद्यादित्याशासे।

–राधावल्लभः त्रिपाठी

कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्

नवदेहली

सूत्रधारः – मन्दं मन्दं वहति पवनः पुष्पं पुष्पं प्रति मधुलिहाम् ।
पङ्क्तिरेषा विचरति यथा रेखा धूमस्य वियति सृता ।।
3 ।।

(आकाशे)

विघ्नराट्– सत्यानुसारिकृतकर्मविपाक ईदृग्
यो धर्मभीरुभिरनुष्ठितभोंगयोग्यः ।
हृन्मर्मभेदनविदारणयोग्यजातो
नान्तं प्रयाति खलु दुःखपरम्परेयम् ।।4।।

सूत्राधार– (कर्णौ पिधाय)
शान्तमशकुनम्! शान्तम्!
अये को नु खल्वेष मयि विज्ञापनव्यग्रेऽशुभमुद्घाटयति।
शुभमस्तु। सद्यस्तावद् गृहं गत्वा सज्जीभवाव।

(निष्क्रान्तौ)

(इति प्रस्तावना)

(ततः प्रविशन्ति सख्यः)

वासन्ती– अद्य देव्या शैव्यया दोलासञ्चालनक्रीडायां वयमाहूताः। तत्किंगर्भ विलम्बयसि?

मालती– राजपुरोहितेन मूचितं यदागामिदिवसे कुमारस्य रोहिताश्वस्य जन्ममहोत्वस्यायोजनं भविष्यति। तदर्भ सज्जीभवेति।

चित्रालेखा– सखि मयाऽस्यायोजनस्य सर्वमेव कार्य सम्पन्नम्। अद्य तु दोलाक्रीडायै गच्छामः।

(निष्क्रान्ताः सख्यः)

(इति विष्कम्भकः)

(ततः प्रविशति विदूषकण सह राजा)

राजा– जिताः समस्ताः प्रबलारिवर्गाः
प्रजाश्च राज्ये सुखशान्तिमग्नाः।
विप्राश्च सम्मानधनादितुष्टास्

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम्)
नवदेहली